**2.4.5 संस्थान ने युवा संकाय सदस्यों को विद्वान गुरुओं के अधीन शास्त्र सीखने में सक्षम बनाने के लिए एक तंत्र तैयार किया है। उन गुरुओं के नाम निर्दिष्ट करें जिनसे शिक्षकों/संकाय सदस्यों ने शास्त्रों/वेद शाखाओं का अध्ययन किया है।**

***Institution has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/Veda Shakhas.***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन तादृशी व्यवस्था प्रकल्पिता वर्त्तते यत्र अस्य विश्वविद्यालयस्य युवानोऽध्यापकाः वरिष्ठानाम् आचार्याणां सन्निधौ तेषां चरणेषु उपविश्यं यथेप्सितं शास्त्रं पठितुं शक्नुवन्ति, यथावसरं मनसि समागताः जिज्ञासाश्चापि समाधातुं शक्नुवन्ति। अत्रत्य वरिष्ठानाम् आचार्याणाम् इयं विशेषता वर्त्तते यत् ते यूनोऽध्यापकान् स्वपुत्रानिव मन्मानाः श्रद्धयाचरणेषु समागतान् निष्ठया अध्यापयन्ति तेषां शङ्काश्च समादधति।

अत्र युवानोऽध्यापकाः लब्धावसराः गुरुगेहेषु गत्वा अपि प्रौढान् परम्परागतग्रन्थान् गुरुसविधेऽधीयते। एवं हि परस्परं प्रेरणा व्यवहरन्तः तौ उभावपि गुरुशिष्यौ स्वजीवनम् उन्नतिपथं नयतः।

अस्मिन् विश्वविद्यालये प्रत्येकं विभागः काले काले 'शास्त्रीयव्याख्यानमाला' इति प्रकल्पं सञ्चाल्य आविश्यं प्रसिद्धानां तत्तद्विषयेषु विचक्षणानां विदुषां व्याख्यानानि आयोजयति। तेषां विदुषां व्याख्यानस्य कार्यक्रमस्य रूपरेखां सङ्कायाध्यक्षः विभागाध्यभेरोण विभागस्थैः आयार्यश्च सार्धं सम्मिल्य सज्ञीकरोति। तत्रकाले एतस्या वार्तायाः अपि विशेषेण ध्यानं क्रियते यत् दूरस्थात् समाहूताः विद्वांसः मात्रायां यद्वा अस्मिन् विश्वविद्यालये कथञ्चिदपि कष्टं नानुभवेति। तेषां विदुषां व्याख्यानस्य अयं लाभो भवति यत् विभागेषु ये युवानोऽध्यापकाः शोधच्छात्राश्च भवन्ति तेभ्यः बहु किमपि शिक्षणाय लभ्यते। तेषां समागतानां विदुषां पुरस्तात् ते स्वकीयान् प्रश्नानृ अपि निश्चिते प्रश्नोत्तरकाले प्रष्टुम् अर्हन्ति तान् च समाधातुं शक्नुवन्ति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः यथानिर्धारितं शास्त्रार्थसभायाः आयोजनम् अपि करोति। तत्र शास्त्रार्थसभायां वरिष्ठानां गुरुणां सान्निध्ये युवभ्योऽहं पकेभ्योऽपि बहूनि प्रशिक्षकाणि दायित्वानि दीयन्ते येन ते बहुविधं ज्ञानं प्राप्नुवन्ति। तेषां सविधे एव ते युवानोऽध्यापकाः परस्मरम् अपि शास्त्रार्थः कुर्वन्ति तत्र यदि काचित् त्रुटिर्भवति तर्हि वरिष्ठाः आचार्याः संशोधनं विधाय परिमार्जनं कुर्वते। अस्यां शास्त्रार्थसभायां युवानोऽध्यापकाः संयोजकरूपेणापि स्वीयं दायित्वं निर्वहन्ति। एकस्मिन् मासे वरिष्ठः आचार्यः संयोजकः कनिष्ठश्च सहसंयोजको भवति एवं हि अग्रिमो मासे अपरौ वरिष्ठ कनिष्ठौ आचार्यौ यथाक्रमं संयोजकस्य सहसंयोजकस्य च दायित्वं निर्वहतः अनया परम्परा कनिमांसः शिक्षकारू अपि संयोजके शनैः शनैः निपुणाः भवन्ति।

इत्यमेव यूनः शिक्षकान् प्रशिक्षितुम् यथावसरं विश्वविद्यालयोऽयं कार्यशालानाम् अपि आयोजनं करोति। तत्रापि कार्यशालायां प्रथितयशसां सूरीणां विशिष्टानि व्याख्यानानि आयोज्यन्ते। अत्रापि शास्त्रार्थसभामिव वरिष्ठानाम् आचार्यणां सन्निधौ कनिष्ठेभ्य आचार्येभ्यः संयोजकादीनां दायित्वं प्रदाय तेषां प्रशिकासं क्रियते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सद्यस्क (ऑनलाइन) माध्यमेनापि विशिष्टानां विदुषां विशिष्टानि व्याख्यानानि आयोजयन्ते। एतस्य विशिष्टस्य व्याख्यानस्य कार्यक्रमः साप्ताहिकी भवति। एतस्य कार्यक्रमस्य अध्यक्षाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यैव कुलपतयो भवन्ति। अयं कार्यक्रमः अस्य विश्वविद्यालयस्य व्याकरणविभागीयस्य प्राचीन व्याकरणे सेवां कुर्वतः डॉ. कुप्पा बिल्वेश शर्ममहाभागस्य संयोजने समायोज्यते। अस्मिन् कार्यक्रमे कृतज्ञगज्ञापकाः स्वागतकर्तारः अथ चापि अन्यत् सर्वं सम्पादकाः अस्यैव सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकवृन्दारकाः भवन्ति। अयं कार्यक्रमः Google meet, Zoom इत्यादिभिः सद्यस्कउपकरणमाध्यमैः प्रतिसप्ताहम् आयोज्यते।

अस्मिन् विश्वविद्यालये न केवलम् इममेव परिपाटी वर्त्तते यत् वरिष्ठेभ्य आचार्येभ्यो युवानोऽध्यपकाः अधीयते किन्तु युवभ्योऽध्यापकेभ्यः शोधच्छात्राः अपि समागत्य तं तं विषयं विषयातिरिक्तान् अपि च ग्रन्थान् पठन्ति। युवभ्योऽध्यापकेभ्यः पठिताः सामग्रीः शोधच्छात्राः स्वीये शोधप्रबन्धेऽपि समाकलयन्ति येन तत्रापि गुणाधानं भवति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये इयं प्रक्रिया न केवलं कस्मिश्चिद् विभागविशेषे भवति अपि तु अस्य विश्वविद्यालयस्य सर्वेषु सङ्कायाः वर्त्तन्ते पुनस्तेषु सङ्कायेषु विभिन्नाः व्याकरणादयो विभागाः सन्ति।

अस्मिन् विश्वविद्यालये यथा वरिष्ठ आचार्याः यूनोऽध्यापकान् अध्यापयन्ति, युवाऽध्यापकाः शोधच्छात्रान् पाठयन्ति तथैव शोधच्छात्रा अपि अत्र विश्वविद्यालये स्थितान् कनिष्ठान् छात्रान् अध्यापयन्ति। तेन शोधच्छात्राणापि लाभो भवर्ति। एवं प्रवर्तितं चक्रमिदं परस्परं सर्वेषां लाभप्रदं भवति। साम्प्रतं वरिष्ठेभ्य आचार्येभ्य ये युवान आचार्या अधीयते अधीतवन्तो वा तेषां केषाञ्चित् नामधेयं प्रस्तूयते –

| क्रम संख्या | अध्यापकः | गुरोर्नाम | शास्त्रम् |
|---|---|---|---|
| 1. | डॉ. दुर्गेश पाठकः | प्रो. राजराम शुक्लः,<br>काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी, कुलपतिचरः -<br>सं.सं.वि.वि., वाराणसी | न्यायः |
| 2. | डॉ. कुप्पा बिल्वेशः | डॉ. आर. मणिद्राविडः, मद्रास् संस्क्रफ़ित कलाशाला, मैलापूर, चेन्नै | अद्वैतवेदान्तः |
| 3. | डॉ. सत्येन्द्र कुमारः | प्रो. महेन्द्र पाण्डेय,<br>सं.सं.वि.वि., वाराणसी | वेदः |
| 4. | डॉ. राजा पाठकः | प्रो. नागेन्द्र पाण्डेयः<br>सेवानिवृत्तः,<br>सं.सं.वि.वि., वाराणसी | ज्योतिषम् |
| 5. | डॉ. राजेश कुमार श्रीवास्तवः | प्रो. रमेश प्रसादः,<br>सं.सं.वि.वि., वाराणसा | पालि |
| 6. | डॉ. दिव्य चेतन ब्रह्मचारी | आचार्य पुरुषोत्तम त्रिपाठी<br>उदासीन सं. महाविद्यालय,<br>मीरघाट | व्याकरणम् |
| 7. | श्री नितन आर्यः | डॉ. रविशङ्कर पाण्डेयः,<br>सं.सं.वि.वि., वाराणसी | व्याकरणम् |

एवं हयन्यानि अपि बहूनि नामधेयानि सन्ति येभ्यः वरिष्ठेभ्यः आचार्येभ्यः कनिमांसः आचार्याः किमपि ग्रन्थविशेषं पठितवन्तः साम्प्रतम् अपि वा पठन्ति च। इत्थं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये एषा समीचीनां ज्ञानविवर्धिनी परम्परा वर्त्तते यत्र युवानोऽध्यापकाः वरिष्ठेभ्य आचार्येभ्यः अधीयते।